# श्रीविष्णु सहस्र

# नाम स्तोत्रम्

गुरु पूर्णिमा (2009) प्रसाद

प्रकाशक

अवधूत दत्त पीठम्

श्रीगणपति सच्चिदानन्द आश्रम, दत्तनगर मैसूरु 570025

प्राप्ति स्थान

कार्यसिद्धि हनुमान मन्दिर

12030, इन्डिपॆन्डॆन्स पार्कवे ड्रैव, फ्रिस्को, टेक्सास, यु एस् ए

# विष्णु सहस्र नाम स्तोत्रम्

## पूर्वपीठिका

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।

व्यासं वसिष्ठ नप्तारं शक्तेः पौत्र मकल्मषम्।

पराशराऽऽत्मजं वन्दे शुकतातं तपोनिधिम्।। 1

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ।। 2

अविकाराय शुद्धाय नित्याय परमाऽऽत्मने।

सदैकरूप रूपाय विष्णवे सर्वजिष्णवे ।। 3

यस्य स्मरणमात्रेण जन्मसंसार बन्धनात्।

विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे।। 4

ओं नमो विष्णवे प्रभविष्णवे।

सच्चिदानन्द रूपाय कृष्णायाक्लिष्ट कारिणे।
नमो वेदान्त वेद्याय गुरवे बुद्धिसाक्षिणे ॥

कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतम्।
वेदान्तभास्करं वन्दे शमाऽऽदि निलयं मुनिम्॥ 6

सहस्रमूर्तेᳶ पुरुषोत्तमस्य सहस्र नेत्राऽऽनन पादबाहोः।
सहस्रनाम्नां स्तवनं प्रशस्तं निरुच्यते जन्म जरादि शान्त्यै॥ 7

श्री वैशंपायन उवाच

श्रुत्वा धर्मा नशेषेण पावनानि च सर्वशः।
युधिष्ठिर श्शान्तनवं पुन रेवाभ्यभाषत॥ 8

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाऽप्येकं परायणम्।
स्तुवन्तᳵ कं कमर्चन्तᳶ प्राप्नुयु र्मानवा श्शुभम्॥ 9

को धर्म स्सर्वधर्माणां भवतᳶ परमो मतः।
किं जपन्मुच्यते जन्तु र्जन्म संसार बन्धनात्॥ 10

श्री भीष्म उवाच

जगत्प्रभुं देवदेव मनन्तं पुरुषोत्तमम्।
स्तुवन्नाम सहस्रेण पुरुष स्सततोत्थितः।। 11

तमेव चार्चयन्नित्यं भक्त्या पुरुष मव्ययम्।
ध्यायन् स्तुवन् नमस्यंश्च यजमान स्तमेव च।। 12

अनादि निधनं विष्णुं सर्वलोक महेश्वरम्।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्।। 13

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं सर्वभूत भवोद्भवम्।। 14

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं स्तवै रर्चे न्नर स्सदा।। 15

परमं यो महत्तेजः परमं यो महत्तपः।
परमं यो महद् ब्रह्म परमं यः परायणम् ।। 16

पवित्राणां पवित्रं यो मङ्गळानां च मङ्गळम्।
दैवतं देवतानाञ्च भूतानां योऽव्ययः पिता।। 17

यत स्सर्वाणि भूतानि भवन्त्यादि युगाऽऽगमे।
यस्मिंश्च प्रलयं यान्ति पुन रेव युगक्षये।। 18

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।
विष्णो र्नाम सहस्रं मे शृणु पाप भयापहम् ।। 19

यानि नामानि गौणानि विख्यातानि महाऽऽत्मनः।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये।। 20

ऋषि र्नाम्नां सहस्रस्य वेदव्यासो महामुनिः।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः।। 21

अमृतांशूद्भवो बीजं शक्ति र्देवकि नन्दनः।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते।। 22

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्।
अनेकरूप दैत्यान्तं नमामि पुरुषोत्तमम्।। 23

अस्य श्रीविष्णो र्दिव्य सहस्र नाम स्तोत्र महामन्त्रस्य, श्री वेदव्यासो भगवानृषिः, अनुष्टुप् छन्दः, श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता, अमृतांशूद्भवो भानुरिति बीजम्, देवकीनन्दन स्स्रष्टेति शक्तिः, उद्भवः - क्षोभणो देव इति परमो मन्त्रः, शङ्ख भृन्नन्दकी चक्रीति कीलकम्, शाङ्र्गधन्वा गदाधर इत्यस्त्रम्, रथाङ्गपाणि रक्षोभ्य इति नेत्रम्, त्रिसामा सामग स्सामेति कवचम्, आनन्दं परब्रह्मेति योनिः, ऋतु स्सुदर्शनः काल इति दिग्बन्धः, विश्वरूप इति ध्यानम्, श्रीमहाविष्णु प्रीत्यर्थे पारायणे विनियोगः।

ध्यानम्

क्षीरोदन्वत्प्रदेशे शुचि मणि विलस त्सैकते मौक्तिकानां
मालाकॢप्ताऽऽसनस्थ स्स्□ टिक मणि निभै र्मौक्तिकै र्मण्डिताङ्गः।
शुभ्रै रभ्रै रदभ्रै रुपरि विरचितै र्मुक्त पीयूष वर्षैः
आनन्दी नः पुनीया दरि नळिन गदा शङ्ख पाणि र्मुकुन्दः।। 1

भूः पादौ यस्य नाभि र्विय दसु रनिल श्चन्द्र सूर्यौ च नेत्रे
कर्णा वाशा श्शिरो द्यौ र्मुख मपि दहनो यस्य वास्तेय मब्धिः।
अन्तस्स्थं यस्य विश्वं सुर नर खग गो भोगि गन्धर्व दैत्यैः
चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णु मीशं नमामि।। 2

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाऽऽकारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगि हृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्व लोकैक नाथम्।। 3

मेघश्यामं पीत कौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम्।
पुण्योपेतं पुण्डरीकाऽऽयताक्षं विष्णुं वन्दे सर्वलोकैकनाथम्।। 4

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम्।
सहार वक्षस्स्थल शोभि कौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम्। 5

छायायां पारिजातस्य हेम सिंहासनोपरि।
आसीन मम्बुद श्याम मायताक्ष मलङ्कृतम्।। 6

चन्द्राऽऽननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसम्।

रुक्मिणी सत्यभामाभ्यां सहितं कृष्ण माश्रये।। 7

## सहस्र नाम स्तोत्रम्

हरिः ओं

विश्वं विष्णु र्वषट्कारो भूत भव्य भवत्प्रभुः।

भूतकृ द्भूतभृ द्भावो भूताऽऽत्मा भूतभावनः।। 1

पूताऽऽत्मा परमाऽऽत्मा च मुक्तानां परमा गतिः।

अव्ययः पुरुष स्साक्षी क्षेत्रज्ञोऽक्षर एव च ।। 2

योगो योगविदां नेता प्रधान पुरुषेश्वरः।

नारसिंह वपु श्श्रीमान् केशवः पुरुषोत्तमः 3

सर्व श्शर्व श्शिव स्स्थाणु र्भूताऽऽदि र्निधि रव्ययः।

संभवो भावनो भर्ता प्रभवः प्रभु रीश्वरः ।। 4

स्वयंभू श्शम्भु रादित्यः पुष्कराक्षो महास्वनः।

अनादि निधनो धाता विधाता धातु रुत्तमः ।। 5

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः।

विश्वकर्मा मनु स्त्वष्टा स्थविष्ठ स्स्थविरो ध्रुवः ।। 6

अग्राह्य श्शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।

प्रभूत स्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ 7

ईशानᳶ प्राणदःᳶ प्राणो ज्येष्ठ श्श्रेष्ठᳶ प्रजापतिः।

हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ 8

ईश्वरो विक्रमी धन्वी मेधावी विक्रमᳵ क्रमः।

अनुत्तमो दुराधर्षᳵ कृतज्ञᳵ कृति रात्मवान् ॥ 9

सुरेश श्शरणं शर्म विश्वरेताᳶ प्रजाभवः।

अह स्संवत्सरो व्यालᳶ प्रत्यय स्सर्वदर्शनः ॥ 10

अज स्सर्वेश्वर स्सिद्ध सिद्धि स्सर्वाऽऽदि रच्युतः।

वृषाकपि रमेयात्मा सर्वयोग विनिस्सृतः ॥ 11

वसु र्वसुमना स्सत्य स्समाऽऽत्मा सम्मित स्समः।

अमोघᳶ पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ 12

रुद्रो बहुशिरा बभ्रु र्विश्वयोनि श्शुचिश्रवाः।

अमृत श्शाश्वत स्स्थाणु र्वरारोहो महातपाः ॥ 13

सर्वग स्सर्ववि द्भानु र्विष्वक्सेनो जनार्दनः।

वेदो वेदवि दव्यङ्गो वेदाङ्गो वेदवित् कविः॥ 14

लोकाध्यक्ष स्सुराध्यक्षो धर्माध्यक्षᳵ कृताकृतः।

चतुरात्मा चतुर्व्यूह श्चतुर्दंष्ट्र श्चतुर्भुजः ॥ 15

भ्राजिष्णु र्भोजनं भोक्ता सहिष्णु र्जगदादिजः।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ 16

उपेन्द्रो वामनः प्रांशु रमोघ श्शुचि रूर्जितः।
अतीन्द्र स्संग्रह स्सर्गो धृताऽऽत्मा नियमो यमः ॥ 17

वेद्यो वैद्य स्सदायोगी वीरहा माधवो मधुः।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ 18

महाबुद्धि र्महावीर्यो महाशक्ति र्महाद्युतिः।
अनिर्देश्यवपु श्श्रीमा नमेयात्मा महाद्रिधृक् ॥ 19

महेष्वासो महीभर्ता श्रीनिवास स्सतां गतिः।
अनिरुद्ध स्सुरानन्दो गोविन्दो गोविदां पतिः ॥ 20

मरीचि र्दमनो हंस स्सुपर्णो भुजगोत्तमः।
हिरण्यनाभ स्सुतपाः पद्मनाभः प्रजापतिः॥ 21

अमृत्यु स्सर्वदृक् सिंह स्सन्धाता सन्धिमान् स्थिरः।
अजो दुर्मर्षण श्शास्ता विश्रुतात्मा सुरारिहा ॥ 22

गुरु र्गुरुतमो धाम सत्य स्सत्य पराक्रमः।
निमिषोऽनिमिष स्स्रग्वी वाचस्पति रुदारधीः ॥ 23

अग्रणी र्ग्रामणी श्श्रीमान् न्यायो नेता समीरणः।
सहस्रमूर्धा विश्वाऽऽत्मा सहस्राक्ष स्सहस्रपात् ।। 24

आवर्तनो निवृत्ताऽऽत्मा संवृत स्संप्रमर्दनः।
अहः स्संवर्तको वह्नि रनिलो धरणीधरः।। 25

सुप्रसादः प्रसन्नाऽऽत्मा विश्वधृ ग्विश्वभु ग्विभुः।
सत्कर्ता सत्कृत स्साधु र्जह्नु र्नारायणो नरः।। 26

असंख्येयोऽप्रमेयात्मा विशिष्ट शिशष्टकृ च्छुचिः।
सिद्धार्थ स्सिद्धसङ्कल्प स्सिद्धिद स्सिद्धिसाधनः ।। 27

वृषाही वृषभो विष्णु र्वृषपर्वा वृषोदरः।
वर्धनो वर्धमानश्च विविक्त श्श्रुतिसागरः ।। 28

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।
नैकरूपो बृहद्रूप शिशपिविष्टः प्रकाशनः ।। 29

ओज स्तेजो द्युति धरः प्रकाशाऽऽत्मा प्रतापनः।
ऋद्ध स्स्पष्टाक्षरो मन्त्र श्चन्द्रांशु र्भास्कर द्युतिः ।। 30

अमृतांशूद्भवो भानु श्शशबिन्दु स्सुरेश्वरः।
औषधं जगत स्सेतु स्सत्य धर्म पराक्रमः।। 31

भूत भव्य भवन्नाथः पवनः पावनोऽनलः।

कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः।। 32

युगादिकृ द्युगाऽऽवर्तो नैकमायो महाऽशनः।

अदृश्यो ऽव्यक्तरूपश्च सहस्रजि दनन्तजित्।। 33

इष्टो विशिष्ट शिशष्टेष्ट शिशखण्डी नहुषो वृषः।

क्रोधहा क्रोधकृत्कर्ता विश्वबाहु र्महीधरः ।। 34

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।

अपांनिधि रधिष्ठान मप्रमत्तः प्रतिष्ठितः।। 35

स्कन्द स्स्कन्दधरो धुर्यो वरदो वायुवाहनः।

वासुदेवो बृहद्भानु रादिदेवः पुरन्दरः ।। 36

अशोक स्तारण स्तार श्शूर श्शौरि र्जनेश्वरः।

अनुकूल श्शताऽऽवर्तः पद्मी पद्मनिभेक्षणः ।। 37

पद्मनाभोऽरविन्दाक्षः पद्मगर्भ श्शरीरभृत्।

महर्द्धिर् ऋद्धो वृद्धाऽऽत्मा महाऽक्षो गरुडध्वजः ।। 38

अतुल श्शरभो भीम स्समयज्ञो हवि र्हरिः।

सर्व लक्षण लक्षण्यो लक्ष्मीवान् समितिञ्जयः ।। 39

विक्षरो रोहितो मार्गो हेतु र्दामोदर स्सहः।
महीधरो महाभागो वेगवा नमिताशनः।। 40

उद्भवः - क्षोभणो देव श्श्रीगर्भः परमेश्वरः।
करणं कारणं कर्ता विकर्ता गहनो गुहः।। 41

व्यवसायो व्यवस्थान स्संस्थान स्स्थानदो ध्रुवः।
परर्द्धिः परम स्पष्ट स्तुष्टः पुष्ट श्शुभेक्षणः ।। 42

रामो विरामो विरतो मार्गो नेयो नयोऽनयः।
वीर श्शक्तिमतां श्रेष्ठो धर्मो धर्मवि दुत्तमः ।। 43

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भ श्शत्रुघ्नो व्याप्तो वायु रधोक्षजः ।। 44

ऋतु स्सुदर्शनः कालः परमेष्ठी परिग्रहः।
उग्र स्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ।। 45

विस्तार स्स्थावर स्स्थाणुः प्रमाणं बीज मव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ।। 46

अनिर्विण्ण स्स्थविष्ठो भू र्धर्मयूपो महामखः।
नक्षत्रनेमि र्नक्षत्री क्षमः - क्षाम स्समीहनः।। 47

यज्ञ इज्यो महेज्यश्च क्रतु स्सत्रं सतां गतिः।
सर्वदर्शी विमुक्ताऽऽत्मा सर्वज्ञो ज्ञान मुत्तमम् ।। 48

सुव्रत स्सुमुख स्सूक्ष्म स्सुघोष स्सुखद स्सुहृत्।
मनोहरो जितक्रोधो वीरबाहु र्विदारणः ।। 49

स्वापन स्स्ववशो व्यापी नैकाऽऽत्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ।। 50

धर्मगु ब्धर्मकृ द्धर्मी सदस त्क्षर मक्षरम्।
अविज्ञाता सहस्रांशु र्विधाता कृतलक्षणः ।। 51

गभस्तिनेमि स्सत्त्वस्थ स्सिंहो भूत महेश्वरः।
आदिदेवो महादेवो देवेशो देवभृ द्गुरुः ।। 52

उत्तरो गोपति र्गोप्ता ज्ञानगम्यश्च पुरातनः।
शरीर भूतभृ द्भोक्ता कपीन्द्रो भूरि दक्षिणः ।। 53

सोमपोऽमृतप स्सोमश्च पुरुजि त्पुरु सत्तमः।
विनयो जय स्सत्यसन्धो दाशार्ह स्सात्त्वतां पतिः ।। 54

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः।
अम्भोनिधि रनन्ताऽऽत्मा महोदधिशयो ऽन्तकः।। 55

अजो महाऽर्ह स्स्वाभाव्यो जिताऽमित्रᳲ प्रमोदनः।

आनन्दो नन्दनो नन्द स्सत्यधर्मा त्रिविक्रमः ।। 56

महर्षिᳲ कपिलाचार्यᳲ कृतज्ञो मेदिनीपतिः।

त्रिपद स्त्रिदशाध्यक्षो महाशृङ्गᳲ कृतान्तकृत् ।। 57

महावराहो गोविन्द स्सुषेणᳲ कनकाङ्गदी।

गुह्यो गभीरो गहनो गुप्त श्चक्र गदा धरः ।। 58

वेधा स्स्वाङ्गो जितᳲ कृष्णो दृढ स्संकर्षणोऽच्युतः।

वरुणो वारुणो वृक्षᳲ पुष्कराक्षो महामनाः ।। 59

भगवान् भगहानन्दी वनमाली हलायुधः।

आदित्यो ज्योतिरादित्य स्सहिष्णु र्गतिसत्तमः ।। 60

सुधन्वा खण्डपरशु र्दारुणो द्रविण प्रदः।

दिवस्स्पृक् सर्वदृग् व्यासो वाचस्पति रयोनिजः ।। 61

त्रिसामा सामग स्साम निर्वाणं भेषजं भिषक्।

सन्न्यासकृ च्छम श्शान्तो निष्ठा शान्तिᳲ परायणम् ।। 62

शुभाङ्ग श्शान्तिद स्स्रष्टा कुमुदᳲ कुवलेशयः।

गोहितो गोपति र्गोप्ता वृषभाक्षो वृषप्रियः ।। 63

अनिवर्ती निवृत्ताऽऽत्मा संक्षेप्ता क्षेमकृ च्छिवः।

श्रीवत्सवक्षा श्श्रीवास श्श्रीपति श्श्रीमतां वरः ।। 64

श्रीद श्श्रीश श्श्रीनिवास श्श्रीनिधि श्श्रीविभावनः।

श्रीधर श्श्रीकर श्श्रेय श्श्रीमान् लोकत्रयाऽऽश्रयः।। 65

स्वक्ष स्स्वङ्ग श्शताऽऽनन्दो नन्दि र्ज्योति र्गणेश्वरः।

विजिताऽऽत्मा विधेयात्मा सत्कीर्ति श्छिन्नसंशयः।। 66

उदीर्ण स्सर्वतश्चक्षु रनीश श्शाश्वत स्स्थिरः।

भूशयो भूषणो भूति र्विशोक श्शोकनाशनः ।। 67

अर्चिष्मा नर्चितः कुम्भो विशुद्धाऽऽत्मा विशोधनः।

अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ।। 68

कालनेमिनिहा वीर श्शौरि श्शूरजनेश्वरः।

त्रिलोकाऽऽत्मा त्रिलोकेशः केशवः केशिहा हरिः ।। 69

कामदेवः कामपालः कामी कान्तः कृतागमः।

अनिर्देश्यवपु र्विष्णु र्वीरोऽनन्तो धनञ्जयः ।। 70

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः।

ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ।। 71

महाक्रमो महाकर्मा महातेजा महोरगः।

महाक्रतु र्महायज्वा महायज्ञो महाहविः ।। 72

स्तव्य स्स्तवप्रिय स्स्तोत्रं स्तुति स्स्तोता रणप्रियः।

पूर्णᳶ पूरयिता पुण्यᳶ पुण्यकीर्ति रनामयः ।। 73

मनोजव स्तीर्थकरो वसुरेता वसुप्रदः।

वसुप्रदो वासुदेवो वसु र्वसुमना हविः ।। 74

सद्गति स्सत्कृति स्सत्ता सद्भूति स्सत्परायणः।

शूरसेनो यदुश्रेष्ठ स्सन्निवास स्सुयामुनः ।। 75

भूताऽऽवासो वासुदेव स्सर्वासुनिलयो ऽनलः।

दर्पहा दर्पदो दृप्तो दुर्धरो ऽथापराजितः ।। 76

विश्वमूर्ति र्महामूर्ति र्दीप्तमूर्ति रमूर्तिमान्।

अनेकमूर्ति रव्यक्त श्शतमूर्ति श्शताऽऽननः ।। 77

एको नैक स्सवᳵ कᳵ किं यत् तत्पद मनुत्तमम्।

लोकबन्धु र्लोकनाथो माधवो भक्तवत्सलः ।। 78

सुवर्णवर्णो हेमाङ्गो वराङ्ग श्चन्दनाङ्गदी।

वीरहा विषम श्शून्यो घृताशी रचल श्चलः ।। 79

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत्।
सुमेधा मेधजो धन्य स्सत्यमेधा धराधरः ।। 80

तेजो वृषो द्युतिधर स्सर्वशस्त्रभृतां वरः।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ।। 81

चतुर्मूर्ति श्चतुर्बाहु श्चतुर्व्यूह श्चतुर्गतिः।
चतुरात्मा चतुर्भाव श्चतुर्वेदवि देकपात् ।। 82

समावर्तो निवृत्ताऽऽत्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ।। 83

शुभाङ्गो लोकसारङ्ग स्सुतन्तु स्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृताऽऽगमः ।। 84

उद्भव स्सुन्दर स्सुन्दो रत्ननाभ स्सुलोचनः।
अर्को वाजसन श्शृङ्गी जयन्त स्सर्वविज्जयी ।। 85

सुवर्णबिन्दु रक्षोभ्य स्सर्व वागीश्वरेश्वरः।
महाह्रदो महागर्तो महाभूतो महानिधिः ।। 86

कुमुदᳵ कुन्दᳵ कुन्दᳶ पर्जन्यᳶ पावनोऽनिलः।
अमृताशो ऽमृतवपु स्सर्वज्ञ स्सर्वतोमुखः ।। 87

सुलभ स्सुव्रत स्सिद्ध श्शत्रुजि च्छत्रुतापनः।
न्यग्रोधो दुम्बरो ऽश्वत्थ श्चाणूराऽऽन्ध्रनिषूदनः।। 88

सहस्रार्चि स्सप्तजिह्व स्सप्तैधा स्सप्तवाहनः।
अमूर्ति रनघोऽचिन्त्यो भयकृ द्भयनाशनः।। 89

अणु र्बृह त्कृश स्स्थूलो गुणभृ न्निर्गुणो महान्।
अधृत स्स्वधृत स्स्वास्थ्यः प्राग्वंशो वंशवर्धनः।। 90

भारभृत् कथितो योगी योगीश स्सर्वकामदः।
आश्रम श्श्रमणः क्षाम स्सुपर्णो वायुवाहनः ।। 91

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः।
अपराजित स्सर्वसहो नियन्ता नियमो यमः ।। 92

सत्त्ववान् सात्त्विक स्सत्य स्सत्य धर्म परायणः।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ।। 93

विहायस गति ज्योति स्सुरुचि र्हुतभु ग्विभुः।
रवि र्विरोचन स्सूर्य स्सविता रविलोचनः ।। 94

अनन्तो हुतभु ग्भोक्ता सुखदो नैकजोऽग्रजः।
अनिर्विण्ण स्सदामर्षी लोकाधिष्ठान मद्भुतः ।। 95

सनात् सनातनतमᳵ कपिलᳵ कपि रव्ययः।

स्वस्तिद स्स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः।। 96

अरौद्रᳵ कुण्डली चक्री विक्रम्यूर्जितशासनः।

शब्दातिग श्शब्दसह शिशिर श्शर्वरीकरः ।। 97

अक्रूरᳶ पेशलो दक्षो दक्षिणः - क्षमिणां वरः।

विद्वत्तमो वीतभयᳶ पुण्य श्रवण कीर्तनः ।। 98

उत्तारणो दुष्कृतिहा पुण्यो दुस्स्वप्न नाशनः।

वीरहा रक्षण स्सन्तो जीवनᳶ पर्यवस्थितः ।। 99

अनन्तरूपो ऽनन्तश्री र्जितमन्यु र्भयापहः।

चतुरश्रो गभीराऽऽत्मा विदिशो व्यादिशो दिशः ।। 100

अनादि र्भू र्भुवो लक्ष्मी स्सुवीरो रुचिराङ्गदः।

जननो जनजन्माऽऽदि र्भीमो भीम पराक्रमः ।। 101

आधार निलयो धाता पुष्पहासᳶ प्रजागरः।

ऊर्ध्वग स्सत्पथाऽऽचारᳶ प्राणदᳶ प्रणवᳶ पणः ।। 102

प्रमाणं प्राणनिलयᳶ प्राणभृत् प्राणजीवनः।

तत्त्वं तत्त्ववि देकात्मा जन्म मृत्यु जराऽतिगः ।। 103

भू र्भुव स्स्व स्तरु स्तार स्सविता प्रपितामहः।
यज्ञो यज्ञपति र्यज्वा यज्ञाङ्गो यज्ञवाहनः ।। 104

यज्ञभृ द्यज्ञकृद् यज्ञी यज्ञभु ग्यज्ञसाधनः।
यज्ञान्तकृ द्यज्ञगुह्य मन्न मन्नाद एव च ।। 105

आत्मयोनि स्स्वयञ्जातो वैखान स्साम गायनः।
देवकी नन्दन स्स्रष्टा क्षितीशः पापनाशनः ।। 106

शङ्खभृ न्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणि रक्षोभ्य स्सर्वप्रहरणाऽऽयुधः ।। 107

श्री सर्वप्रहरणायुध ओं नम इति।

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी।
श्रीमान् नारायणो विष्णु र्वासुदेवोऽभिरक्षतु।।(3) 108

श्री वासुदेवोऽभिरक्षत्वो न्नम इति।

उत्तर पीठिका

इतीदं कीर्तनीयस्य केशवस्य महाऽऽत्मनः।
नाम्नां सहस्रं दिव्याना मशेषेण प्रकीर्तितम् ।। 1

य इदं शृणुया न्नित्यं यश्चापि परिकीर्तयेत्।
नाशुभं प्राप्नुयात् किञ्चित्सोऽमुत्रेह च मानवः ।। 2

वेदान्तगो ब्राह्मण स्स्यात् क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्ध स्स्या च्छूद्र स्सुख मवाप्नुयात् ।। 3

धर्मार्थी प्राप्नुया द्धर्म मर्थार्थी चार्थ माप्नुयात्।
कामा नवाप्नुयात् कामी प्रजाऽर्थी चाप्नुयात् प्रजाम् ।। 4

भक्तिमान् य स्सदोत्थाय शुचि स्तद्गत मानसः।
सहस्रं वासुदेवस्य नाम्ना मेतत् प्रकीर्तयेत् ।। 5

यशः प्राप्नोति विपुलं याति प्राधान्य मेव च।
अचलां श्रिय माप्नोति श्रेयः प्राप्नो त्यनुत्तमम् ।। 6

न भयं क्वचि दाप्नोति वीर्यं तेजश्च विन्दति।
भव त्यरोगो द्युतिमान् बल रूप गुणान्वितः ।। 7

रोगाऽऽर्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्।
भया न्मुच्येत भीतस्तु मुच्ये ताऽऽपन्न आपदः ।। 8

दुर्गा ण्यति तरत्याशु पुरुषः पुरुषोत्तमम्।
स्तुवन्नाम सहस्रेण नित्यं भक्ति समन्वितः ।। 9

वासुदेवाऽऽश्रयो मर्त्यो वासुदेव परायणः।
सर्व पाप विशुद्धाऽऽत्मा याति ब्रह्म सनातनम् ।। 10

न वासुदेव भक्ताना मशुभं विद्यते क्वचित्।

जन्म मृत्यु जरा व्याधि भयं नैवोपजायते ॥ 11

इमं स्तव मधीयान श्श्रद्धा भक्ति समन्वितः।

युज्येताऽऽत्मसुख क्षान्ति श्री धृति स्मृति कीर्तिभिः ॥ 12

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।

भवन्ति कृत पुण्यानां भक्तानां पुरुषोत्तमे ॥ 13

द्यौ स्स चन्द्रार्क नक्षत्रं खं दिशो भू र्महोदधिः।

वासुदेवस्य वीर्येण विधृतानि महाऽऽत्मनः ॥ 14

ससुरासुर गन्धर्वं सयक्षोरग राक्षसम्।

जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ 15

इन्द्रियाणि मनो बुद्धि स्सत्त्वं तेजो बलं धृतिः।

वासुदेवाऽऽत्मका न्याहुः - क्षेत्रं क्षेत्रज्ञ एव च ॥ 16

सर्वाऽऽगमाना माचारꣳ प्रथमं परिकल्पते।

आचार प्रभवो धर्मो धर्मस्य प्रभु रच्युतः ॥ 17

ऋषयꣳ पितरो देवा महाभूतानि धातवः।

जङ्गमाजङ्गमं चेदं जग न्नारायणोद्भवम् ॥ 18

योगो ज्ञानं तथा साङ्ख्यं विद्या शिल्पादि कर्म च।

वेदा श्शास्त्राणि विज्ञान मेत त्सर्वं जनार्दनात् ।। 19

एको विष्णु र्महद् भूतं पृथग् भूता न्यनेकशः।

त्रीन्लोकान् व्याप्य भूताऽऽत्मा भुङ्क्ते विश्वभु गव्ययः।। 20

इमं स्तवं भगवतो विष्णो र्व्यासेन कीर्तितम्।

पठेद्य इच्छेत् पुरुष श्श्रेयः प्राप्तुं सुखानि च ।। 21

विश्वेश्वर मजं देवं जगतः प्रभु मव्ययम्।

भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ।। 22

न ते यान्ति पराभवमों नम इति।

अर्जुन उवाच

पद्मपत्र विशालाक्ष पद्मनाभ सुरोत्तम।

भक्ताना मनुरक्तानां त्राता भव जनार्दन ।। 23

श्रीभगवानुवाच

यो मां नाम सहस्रेण स्तोतु मिच्छति पाण्डव।

सोऽह मेकेन श्लोकेन स्तुत एव न संशयः ।। 24

स्तुत एव न संशय ओं नम इति।

व्यास उवाच

वासना द्वासुदेवस्य वासितन्ते जगत्त्रयम्।

सर्व भूत निवासोऽसि वासुदेव नमोऽस्तु ते ।। 25

श्री वासुदेव नमोऽस्तुत ओं नम इति।

पार्वत्युवाच

केनोपायेन लघुना विष्णो र्नाम सहस्रकम्।

पठ्यते पण्डितै र्नित्यं श्रोतु मिच्छाम्यहं प्रभो।। 26

ईश्वर उवाच

श्रीराम राम रामेति रमे रामे मनोरमे।

सहस्रनामत स्तुल्यं राम नाम वरानने ।। (3) 27

श्रीराम नाम वरानन ओं नम इति।

ब्रह्मोवाच

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरुबाहवे।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि युगधारिणे नमः।। 28

श्री सहस्रकोटि युगधारिण ओं नम इति।

सञ्जय उवाच

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।

तत्र श्री र्विजयो भूति र्ध्रुवा नीति र्मति र्मम ।। 29

श्रीभगवानुवाच

अनन्या श्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभियुक्तानां योग क्षेमं वहाम्यहम् ।। 30

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्म संस्थापनार्थाय संभवामि युगे युगे ।। 31

आर्ता विषण्णा शिशिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः।

संकीर्त्य नारायण शब्दमात्रं विमुक्त दुःखा स्सुखिनो भवन्ति ।। 32

इति श्री महाभारते शतसाहस्त्रिकायां संहितायां, वैयासिक्या मनुशासन पर्वान्तर्गत - आनुशासनिक पर्वणि, मोक्षधर्मे भीष्म युधिष्ठिर संवादे, श्रीविष्णो र्दिव्य सहस्रनाम स्तोत्रं नामैकोन पञ्चशताधिक शततमोऽध्यायः।

यदक्षर पदभ्रष्टं मात्राहीनं तु यद् भवेत्।

तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तुते।।

श्री कृष्णार्पणमस्तु।

# महालक्ष्मी - अष्टोत्तर शत नाम स्तोत्रम्

पूर्व पीठिका

देव्युवाच

देव देव महादेव त्रिकालज्ञ महेश्वर।

करुणाकर देवेश भक्तानुग्रह कारक।। 1

अष्टोत्तर शतं लक्ष्म्या श्श्रोतु मिच्छामि तत्त्वतः।

ईश्वर उवाच

देवि साधु महाभागे महाभाग्य प्रदायकम्।। 2

सर्वैश्वर्यकरं पुण्यं सर्व पाप प्रणाशनम्।

सर्वदारिद्र्य शमनं श्रवणा द्भुक्ति मुक्तिदम्।। 3

राजवश्यकरं दिव्यं गुह्या द्गुह्यतरं परम्।

दुर्लभं सर्वदेवानां चतुष्षष्टि कळाऽऽस्पदम्।। 4

पद्माऽऽदीनां वरान्तानां निधीनां नित्यदायकम्।

समस्त देव संसेव्य मणिमाऽऽद्यष्ट सिद्धिदम्।। 5

किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकम्।

तव प्रीत्याऽद्य वक्ष्यामि समाहितमना श्शृणु।। 6

अस्य श्री लक्ष्म्यष्टोत्तर शतनाम स्तोत्र महामन्त्रस्य, महालक्ष्मीर्देवता, क्लीं बीजं, भुवनेश्वरी शक्तिः, श्री महालक्ष्मी प्रसाद सिद्ध्यर्थे पारायणे विनियोगः।।

ध्यानम्

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
  हस्ताभ्या मभयप्रदां मणिगणै र्नाना विधै र्भूषिताम्।
भक्ताभीष्ट  लप्रदां हरिहर ब्रह्मादिभि स्सेवितां
  पार्श्वे पङ्कज शङ्ख पद्म निधिभि र्युक्तां सदा शक्तिभिः।।
सरसिजनयने सरोजहस्ते धवळतरांशुक गन्ध माल्य शोभे।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम्।।

अष्टोत्तर शतनाम स्तोत्रम्

प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम्।
  श्रद्धां विभूतिं सुरभिं नमामि परमाऽऽत्मिकाम्।। 1
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम्।
  धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम्।। 2
अदितिञ्च दितिं दीप्तां वसुधां वसुधारिणीम्।
  नमामि कमलां कान्तां कामां क्षीरोदसंभवाम्।

अनुग्रहप्रदां बुद्धि मनघां हरिवल्लभाम्।
अशोका ममृतां दीप्तां लोकशोक विनाशिनीम्।। 3

नमामि धर्मनिलयां करुणां लोकमातरम्।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम्।। 4

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम्।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीं।। 5

पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम्।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम्।। 6

चतुर्भुजां चन्द्ररूपा-मिंदिरा मिन्दु शीतलाम्।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम्।। 7

विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीम्।
प्रीतिपुष्करिणीं शान्तां शुक्लमाल्यांबरां श्रियम्।। 8

भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम्।
वसुन्धरा मुदाराङ्गां हरिणीं हेममालिनीम्।। 9

धनधान्यकरीं सिद्धिं स्त्रैण सौम्यां शुभप्रदाम्।
नृपवेश्मगताऽऽनन्दां वरलक्ष्मीं वसुप्रदाम्।। 10

शुभां हिरण्य प्राकारां समुद्रतनयां जयाम्।

नमामि मङ्गळां देवीं विष्णुवक्षस्स्थल स्थिताम्।। 11

विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रिताम्।

दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम्।। 12

नवदुर्गां महाकाळीं ब्रह्मविष्णुशिवाऽऽत्मिकाम्।

त्रिकालज्ञान संपन्नां नमामि भुवनेश्वरीम्।। 13

उत्तर पीठिका

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं

दासीभूत समस्त देववनितां लोकैक दीपाङ्कुराम्।

श्रीमन्मंद कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां

त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वन्दे मुकुंदप्रियाम्।। 1

मातर्नमामि कमले कमलाऽऽयताक्षि

श्रीविष्णुहृत्कमलवासिनि लोकमातः।

क्षीरोदजे कमलकोमल गर्भगौरि

लक्ष्मि प्रसीद सततं नमतां शरण्ये।। 2

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेन्द्रियः।

दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोति यत्नतः।। 3

देवीनाम सहस्रेषु पुण्यमष्टोत्तरं शतम्।
येन श्रियमवाऽऽप्नोति कोटि जन्म दरिद्रतः।। 4

भृगुवारे शतं धीमान् पठे द्वत्सर मात्रकम्।
अष्टैश्वर्यमवाऽऽप्नोति कुबेर इव भूतले।। 5

दारिद्र्यमोचनं नाम स्तोत्र मंबा परं शतम्।
येन श्रियमवाऽऽप्नोति कोटि जन्म दरिद्रतः।। 6

भुक्त्वा तु विपुलान् भोगा नन्ते सायुज्य माप्नुयात्।
प्रातः काले पठेन्नित्यं सर्व दुःखोपशान्तये।। 7

पठंस्तु चिन्तये द्देवीं सर्वाभरणभूषिताम्।।

इति श्री लक्ष्म्यष्टोत्तर शतनामस्तोत्रं संपूर्णम्

## महालक्ष्म्यष्टकम्

इन्द्र उवाच

नमस्ते ऽस्तु महामाये श्री पीठे सुरपूजिते ।
शङ्ख चक्र गदा हस्ते महालक्ष्मि नमोऽस्तुते ।। 1

नमस्ते गरुडाऽऽरूढे कोलासुर भयङ्करि।
सर्वपापहरे देवि महालक्ष्मि नमोस्तुते ।। 2

सर्वज्ञे सर्ववरदे सर्वदुष्ट भयङ्करि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोस्तुते ।। 3

सिद्धि बुद्धि प्रदे देवि भुक्तिमुक्ति प्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोस्तुते ।। 4
आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि।
योगजे योग संभूते महालक्ष्मि नमोस्तुते ।। 5
स्थूल सूक्ष्म महारौद्रे महाशक्ते महोदरे ।
महापापहरे देवि महालक्ष्मि नमोस्तुते ।। 6
पद्माऽऽसन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मात - र्महालक्ष्मि नमोस्तुते ।। 7
श्वेताम्बरधरे देवि नानालङ्कार भूषिते ।
जगत् स्थिते जगन्मात - र्महालक्ष्मि नमोस्तुते ।। 8
महालक्ष्म्यष्टक स्तोत्रं यः पठे द्भक्तिमा न्नरः।
सर्वसिद्धि मवाप्नोति सौख्यं प्राप्नोति सर्वदा ।। 9
एककाले पठेन्नित्यं महापाप विनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्य समन्वितः ।। 10
त्रिकालं यः पठेन्नित्यं महाशत्रु विनाशनम् ।
महालक्ष्मी र्भवे न्नित्यं प्रसन्ना वरदा शुभा।। 11

इति इन्द्रकृतं श्रीमहालक्ष्म्यष्टकम् संपूर्णम्